# भूमिका

भारतीयसंस्कृतिः सर्वासु संस्कृतिसु प्राचीनतमा संस्कृतिः वर्तते। भारतीय– संस्कृत –वाङ्मयमतीवसमृद्धं विस्तृतं चाऽस्ति। तत्र विभागद्वयं वर्तते। वैदिकसाहित्यं लौकिकसाहित्यञ्च। समस्त संस्कृतवाङ्मयस्य उपजीव्याः चत्वारोवेदाः एव। कथितं यत् ––

**"इतिहासपुराणाभ्यांवेदंसमुपबृह्येत।**

मानवजीवने चतुर्विधपुरुषार्थ सिद्धयर्थं चतुर्दश विद्यास्थानानि कथितानि। यथा ऋक–यजु–साम–अथर्व– वेदाः, शिक्षा–कल्प– व्याकरण–निरुक्त–छन्दो–ज्योतिषादीनिति षड्वेदाङ्गानि तत्र ज्योतिषशास्त्रं काल–प्रदर्शकमितिकारणेन नेत्ररूपेण स्वीक्रियते। अस्य शास्त्रस्य उत्पत्तिः ब्रह्मणः एव अभूत्। ब्रह्मणाप्रवर्तितंज्योतिषमिदम् उत्तरोत्तरादतः पराशर– मैत्रेय–पर्यन्तम् स्वशिष्येभ्यः प्रोक्तम् । यथागर्गाचार्येणकथितम् –

स्वयंस्वयम्भुवा सृष्टं चक्षुर्भूतं द्विजन्मनाम्।
वेदौं ज्योतिषंब्रह्मपरं यज्ञहितावहम्।
मयास्वम्भुवः प्राप्तंक्रियाकालप्रसाधनम् ।।[2]

अस्य ज्योतिषशास्त्रस्य प्रवर्तकाः अष्टादशआचार्याः सन्ति। यथा––

सूर्यः पितामहोव्यासोवशिष्ठोऽत्रिः पराशरः ।
कश्यपोनारदोगर्गोमरीचिर्मनुरौंरिः ।
रोमशः पौलिशश्चैवच्यवनो यवनोभृगुः।
शौनकोऽष्टादशश्चैतेज्योतिशास्त्रप्रवर्तकाः।।[3]

ज्योतिषशास्त्रे लगधनाम्नामुनिप्रणीतवेदाङ्गे ज्योतिषग्रन्थः प्राचीनतमे–ग्रन्थः वर्तते। अनन्ताकाशे सूर्यचन्द्रताराग्रहा नक्षत्राणां –ज्योतिपिण्डानां कालावस्था–भूतलेगतियुतिस्थित्यानुसारेण मनुष्यजीवने च प्रभावोकथं भवति इत्यस्यशास्त्रस्य विषयः। ग्रहनक्षत्राणां गतिविधि कारणेन योगानां मनुष्यजीवनोपरि प्रभावः भवति।

---

**1.** महाभारत– 1/268

2. ज्यो.शा. इतिहास, पृ. 10 **3.** कश्यपसंहिता– 1/ 2–3

ज्योतिषशास्त्रे अनेकेविषयाः सन्ति तत्रापि योगाना ंविषयेऽपि विवेचनं प्राप्यते। योगाः अनैकविधाः सन्ति। तत्र प्रमुखरूपेणनाभसयोगाः पञ्चमहापुरुषयोगाः अरिष्टयोगाः राजयोगाः प्रवज्यायोगाः, रोगकारकयोगाः वर्णिताः सन्ति।

वर्तमानकाले मनुष्यजीवने अर्थप्राप्तिरेव प्रमुखहेतुः। सर्वेगुणाः काञ्चनमाश्रयन्ते । ज्योतिषशास्त्रे राजयोगतः ज्ञायते यत् मनुष्यः केन प्रकारेण राजसुखं, धनसुखं, सत्तासम्पत्तिञ्च प्राप्नोति। अत एव मया सर्वजनहिताय औत्सुक्येन राजयोगविषये शोधकार्यं कृतमिति । राजयोगेषु अपि मुख्यत्वेन त्रयभेदाः सन्ति। यथा–

1.महायोगः 2.विपरीतराजयोगः 3.नीचभङ्गः राजयोगः ।

तत्र ज्योतिषशास्त्रस्य विविध ग्रन्थेषु राजयोगनां वर्णनं प्राप्यते तथा च राजयोगः कदाभवति ? केनकारणेनतस्य भङ्गः भवति ? केषां ग्रहाणां संयोगे कस्मिन् लग्ने प्राप्यते। ग्रहाणां शुभाशुभस्थानस्वामित्व –कारणेन कीदृशोप्रभावोपजायते इत्येषां सर्वेषां विषयाणां विश्लेषणं पाराशर–कालिदास–गर्गाचार्य–वराहमिहिर–नारदादिप्रमुखाचार्यैः प्रतिपादितम्।

राजयोगविषये इतः पूर्वं यत् संशोधनं जातं किन्तु राजयोगानां विश्लेणात्मकमध्ययनं ज्योतिर्विदां ज्योतिषरसिकाणां च कृते स्वतंत्ररूपेण अद्यावधिनैवभूतम् । अतः अनेन शोधकार्येणपरवर्तीनां जनानां शोधच्छात्राणां च कृते बहु उपयोगिभवेदित्याशय कार्यं कृतमस्ति ।

मया शोधप्रबन्धः चतुर्षु अध्यायेषु विभक्तः कृतः।

**प्रथमेहि** ज्योतिषशास्त्रस्य परिचयः तस्य मूलभूततत्वानि, योगशब्दस्य परिचय–प्रकराणि, राजयोगानां परिचयः, तेषां भेदाः एवं प्रमुखाचार्याणां मते प्रमुखराजयोगाः तथा च विविधोदहरणपूर्वकं तेषां विश्लेणात्मकम् अध्ययनं सम्पादितम् ।

**द्वितीयोध्यायः** योगपरिचयात्मकः अस्ति । तत्र मनुष्यजन्मस्य खगोलीयग्रहस्थित्याधारेणग्रह–नक्षत्र–राशि–तिथिवारादीनां पञ्चाङ्गपूर्वकं जन्मपत्रिका क्रियते दैवज्ञः। तस्य जन्मप्रत्रिकायाः ग्रहयोगाधारेण प्रभावपूर्वकं फलनिर्देशनं क्रियते तत्र कोऽपि मनुष्यजीवने स्वकीये

जीवनकालेकानि–कानि प्रकारणानिभागसाधनानि प्राप्यते कदा प्राप्यते केन उपायेन प्राप्यतेतत् सर्वं ज्योतिषोक्तं योग भेदेनज्ञातुं शक्यते। कोऽपिकार्यस्य सिद्धिः यथायोग्यं ग्रहयोगं विहाय नाऽपिसम्भवितुं शक्यते। योगशब्दः अतीव महत्वपूर्णम् अस्माकं कृते। अतः योग शब्दस्य अर्थ स्पष्टीकरणमतीवम् आवश्यकम् ।

''यदुपचितमन्यजन्मनि शुभाशुभंतस्य कर्मणापंक्तिम् ।
व्यञ्जयति शास्त्रमेतन्नमसिद्रव्याणिदीपइव ।।

**तृतीयेऽध्याये** राजयोगपरिचयात्मकः निरूपणमस्ति। तत्र ज्योतिशास्त्रे भिन्न–भिन्नसंयोगे जनिताः योगाः पूर्ववर्णिताः सन्ति। तत्र जातकाय जीवने याः योगाः प्रवज्या प्रेरकाः सन्ति ते प्रवज्यायोगः कथ्यन्ते। यः योगः जातकाय दारिद्रयं ददातितन्नामदरिद्रयोगः। यः योगः रुग्णंकरोतितन्नाम–रोगकारकयोगः। तद्वत् यः योगः जातकाय राज्ञतुल्यं वैभव–ऐश्वर्य–धन–सौख्य–यश–पराक्रम–कीर्ति–सत्ता–समृद्धि–भूमिसुख–गजाश्वादि–वाहन सुखम् इत्यादिकं वा प्रयच्छति तन्नाम् राजयोगः।

यस्य कस्यापि जातकस्य जन्मपत्रिकायां यथा विशिष्ट ग्रहराशि–भाव –भावानां–युति–दृष्टिसम्बन्धसंयोगेन ये विशिष्टयोगाः भवन्ति तथैव ते राजयोगाः बलिष्ठकेन्द्र–त्रिकोणयोगकारकैः ग्रहसंयोगैः च उद्भवन्ति।

जातकानां जन्मपत्रिकासु मेषादिद्वादशलग्नेषु योगकारकग्रहैः राजयोगाः कथम् उद्भवन्ति तथा च तेषां कथं प्रभावाः प्रभवन्ति तथा च तत् फलं जातकस्य जीवने कथं प्रभवति इत्यादिकं सर्वम् अत्र वर्णितं मया।

ज्योतिषशास्त्रे वराहमिहिर, पाराशर, मन्त्रेश्वर, कालिदास, कल्याणवर्मा, जैमिनी, रामानुजाचार्य एतेआचार्याः प्रमुखाः सन्ति। तेषां मतेऽपि यत्र तत्रापि साम्यं यत्रतत्रापि वैषम्यं वर्तते। तेषांमतानाम् उदाहरणपूर्वकं मया शोधप्रबन्धे निर्दिष्टमिति ।

**चतुर्थोऽध्यायः** अध्यायः समीक्षात्मकः वर्तते। ज्योतिषशास्त्रे अनेकैः आचार्यैः स्वग्रन्थेषु राजयोगानां गणना कृता। किन्तु नाम भेदाः प्राप्यन्ते, फलेषु भेदाः अपि प्राप्यन्ते। एतेषां सर्वेषां राजयोगानां मया शोधप्रवन्धे उदाहरणानि प्रतिपादितानि। राजयोगानां प्रमुखभेदाः त्रयः एव सन्ति ।

1.महायोगाः 2.विपरीतराजयोगाः 3.नीचभङ्गराजयोगाः।

ज्योतिषशास्त्रस्य प्रमुखाचार्यैः स्वकीयग्रन्थे तेषां वर्णनं विस्तरेण कृतमस्ति। बृहद्पाराशरहोराशास्त्रे श्रीपराशरेणकेन्द्र – त्रिकोणग्रहजनित उच्चस्थ–ग्रहजनितः तथा च जन्मलग्न–होरालग्न–घटीलग्न एवं कारकांश–लग्नाधरेण घटिताः राजयोगाः कथिता।अस्मिन् अध्याये कतिचन विख्यातराजयोगयुक्त जन्मकुण्डलीनां विश्लेषणं कृतम् मया।

तत्र काचन प्राचीनराज योगकारी कुण्डल्यः उदाहृत्य तद्विश्लेषणं कृतमस्ति। काचनवर्तमानकालिकानां राजपुरुषाणां कतिपयानां कुण्डल्यः प्रसिद्धजनानां कुण्डल्यः विभिन्नक्षत्रेषु अग्रगण्यजनानां कुण्डलीं च उदाहृत्य कुण्डल्यः तासु उद्भूतराजयोगानां सूक्ष्मविश्लेषणम् अस्मिन् प्रकरणे अहं कृतवती ।

**पर्यन्ते च मयोपसंहारः** संश्लिष्टः। ततः परं आधारग्रन्थानां नामानि च लिखितानि ।अत्रोपस्थापिता मया शीर्षकानुक्रमणिकेति ।